শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ দ্বিষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ দ্বিষষ্টিতমঃ সর্গঃ ॥

## দুঃখিতেন রাজ্ঞা সাঞ্জলিবন্ধং কৌসল্যাযাঃ প্রসাদনং কৌসল্যযা তস্য পাদযোঃ প্রণিপত্য ক্ষমাপ্রার্থনম্

এৱং তু ক্রুদ্ধযা রাজা রামমাত্রা সশোকযা।
শ্রাৱিতঃ পরুষং ৱাক্যং চিন্তযামাস দুঃখিতঃ॥ **2.62.1** ॥

চিন্তযিৎৱা স চ নৃপো মোহৱ্যাকুলিতেন্দ্রিযঃ।
অথ দীর্ঘেণ কালেন সংজ্ঞামাপ পরন্তপঃ॥ **2.62.2** ॥

স সংজ্ঞামুপলভ্যৈৱ দীর্ঘমুষ্ণং চ নিঃশ্ৱসন্।
কৌসল্যাং পার্শ্ৱতো দৃষ্টৱা ততশ্চিন্তামুপাগমৎ॥ **2.62.3** ॥

তস্য চিন্তযমানস্য প্রত্যভাৎ কর্ম দুষ্কৃতম্।
যদনেন কৃতং পূর্ৱমজ্ঞানাচ্ছব্দৱেধিনা॥ **2.62.4** ॥

অমনাস্তেন শোকেন রামশোকেন চ প্রভুঃ।
দ্ৱাভ্যামপি মহারাজঃ শোকাভ্যামভিতপ্যতে॥ **2.62.5** ॥

দহ্যমানস্তু শোকাভ্যাং কৌসল্যামাহ দুঃখিতঃ।
ৱেপমানোঽঞ্জলিং কৃৎৱা প্রসাদার্থমৱাঙ্মুখঃ॥ **2.62.6** ॥

প্রসাদযে ৎৱাং কৌসল্যে রচিতোঽযং মযাঞ্জলিঃ।
ৱৎসলা চানৃশংসা চ ৎৱং হি নিত্যং পরেষ্ৱপি॥ **2.62.7** ॥

ভর্তা তু খলু নারীণাং গুণৱান্ নির্গুণোঽপি ৱা।
ধর্মং ৱিমৃশমানানাং প্রত্যক্ষং দেৱি দৈৱতম্॥ **2.62.8**॥

সা ৎৱং ধর্মপরা নিত্যং দৃষ্টলোকপরাৱরা।
নার্হসে ৱিপ্রিযং ৱক্তুং দুঃখিতাপি সুদুঃখিতম্॥ **2.62.9**॥

তদ্ ৱাক্যং করুণং রাজ্ঞঃ শ্রুৎৱা দীনস্য ভাষিতম্।
কৌসল্যা ৱ্যসৃজদ্ বাষ্পং প্রণালীৱ নৱোদকম্॥ **2.62.10**॥

সা মূর্ধ্নি বদ্ধ্ৱা রুদতী রাজ্ঞঃ পদ্মমিৱাঞ্জলিম্।
সম্ভ্রমাদব্রৱীৎ ত্রস্তা ৎৱরমাণাক্ষরং ৱচঃ॥ **2.62.11**॥

প্রসীদ শিরসা যাচে ভূমৌ নিপতিতাস্মি তে।
যাচিতাস্মি হতা দেৱ ক্ষন্তৱ্যাহং নহি ৎৱযা॥ **2.62.12**॥

নৈষা হি সা স্ত্রী ভৱতি শ্লাঘনীযেন ধীমতা।
উভযোর্লোকযোর্লোকে পত্যা যা সম্প্রসাদ্যতে॥ **2.62.13**॥

জানামি ধর্মং ধর্মজ্ঞ ৎৱাং জানে সত্যৱাদিনম্।
পুত্রশোকার্তযা তত্তু মযা কিমপি ভাষিতম্॥ **2.62.14**॥

শোকো নাশযতে ধৈর্যং শোকো নাশযতে শ্রুতম্।
শোকো নাশযতে সর্ৱং নাস্তি শোকসমো রিপুঃ॥ **2.62.15**॥

শক্যমাপতিতঃ সোঢুং প্রহারো রিপুহস্ততঃ।
সোঢুমাপতিতঃ শোকঃ সুসূক্ষ্মোঽপি ন শক্যতে॥ **2.62.16**॥

ৱনৱাসায রামস্য পঞ্চরাত্রোঽত্র গণ্যতে।
যঃ শোকহতহর্ষাযাঃ পঞ্চৱর্ষোপমো মম॥ **2.62.17**॥

তং হি চিন্তযমানাযাঃ শোকোঽযং হৃদি ৱর্ধতে।
নদীনামিৱ ৱেগেন সমুদ্রসলিলং মহৎ॥ **2.62.18**॥

এৱং হি কথযন্ত্যাস্তু কৌসল্যাযাঃ শুভং ৱচঃ।
মন্দরশ্মিরভূৎ সূর্যো রজনী চাভ্যৱর্তত॥ **2.62.19**॥

অথ প্রহ্লাদিতো ৱাক্যৈর্দেৱ্যা কৌসল্যযা নৃপঃ।
শোকেন চ সমাক্রান্তো নিদ্রাযা ৱশমেযিৱান্॥ **2.62.20**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
অযোধ্যাকাণ্ডে দ্বিষষ্টিতমঃ সর্গঃ॥